This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



त

नांत ४

॥श्रीगणेशाय नमः॥ बालोऽपि यो न्यायनये प्रवेशमल्पेन वां
छत्यलसः श्रुतेन॥ संक्षिप्तयुक्त्यन्वित तर्कभाषा प्रकाश्यते त
स्य कृते मयैषा॥१॥ प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांताव
यवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थाना
नां तत्वज्ञानान्निश्रेयसाधिगम इति न्यायस्यादिमं सूत्रं॥ ॥अस्यार्थः
प्रमाणादिषोडशपदार्थानां तत्वज्ञानान्मोक्षप्राप्तिर्भवतीति॥ न च प्रमा
णादीनां तत्वज्ञानं सम्यग्ज्ञानं तावद्भवति यावदेषामुद्देशलक्षणप
रीक्षा न क्रियंते॥ यदाह भाष्यकारः॥ त्रिविधा चास्य शास्त्रस्य प्रवृ
त्तिः उद्देशो लक्षणं परीक्षा चेति॥ उद्देशस्तु नाममात्रेण वस्तुसंकीर्त्तनं॥

॥१॥

Acc. No ~~तर्कभाषा १११~~ M1485
Title — तर्कभाषा. (अपूर्ण)
Author — केशवमिश्र.
Date — ?
Subject — न्याय.
folio — 12
xerox — 22

KKSU LIBRARY
RAMTEK
441 106
M.1485
Dist Nagpur

Checked 2012



यथा

तत्रास्मिन्नेवसूत्रेहतौ ळक्षणं त्वसाधारणधर्मवचनं॥ यथा गोस

स्नादिमत्वं॥ ळक्षितस्य ळक्षणमुपपद्यते न वेति विचारः परीक्षा॥ तेनैते

ळक्षणपरीक्षे प्रमाणादीनां तत्वज्ञानार्थं कर्त्तव्ये॥ तत्रापि प्रथममुद्दि

ष्टस्यैतावळ्ळक्षणमुच्यते॥ प्रमाकरणं प्रमाणं॥ अत्र प्रमाणं ळक्ष्यं॥ प्र

माकरणं ळक्षणं॥ ननु प्रमायाः करणं चेत्प्रमाणं तर्हि तस्य फळेवक्तव्यं

करणस्य फळवत्वनियमात्॥ सत्यं प्रमैव फळं॥ साध्यमि[illegible] र्थः॥ यथ स

च्छिदाकरणस्य परशोः छिदैव फळं॥ का पुनः प्रमा॥ यस्याः करणं प्रमा

णं॥ उच्यते॥ यथार्थानुभवः प्रमा॥ यथार्थ[illegible] यथार्थानां संशयवि

पर्ययतर्कज्ञानानां निरासः॥ अनुभवे इति स्मृतेर्निरासः॥ अळक्षवो

व इयर

प्रमाण
[illegible] ४

घ५ संस्कारमात्रजन्यं ज्ञानं स्मृतिः ॥१

तर्का॥ नामस्मृतिव्यतिरिक्तं ज्ञानं ॥ किंपुनः कणेरे ॥ साधकतमं कारणं ॥ अतिशा
यितं साधकं साधकतमं ॥ प्रकृष्टं कारणमित्यर्थः ॥ ननु साधकं कारणमि
ति पर्यायः ॥ तदेव न ज्ञायते किं तत्कारणमिति ॥ उच्यते ॥ यस्य कार्यात्पू
घ५ र्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणं ॥ यथा तन्तुवेमादिकं पट
स्य ॥ यद्यपि [illegible] टोत्पत्तौ दैवादागतस्य रासभादेः पूर्वभावो विद्यते तथापि ना
॥२॥ सौ नियतः ॥ तन्तुरूपस्य नियतः पूर्वभावोऽस्त्येव किं त्वन्यथासिद्धः ॥ पटरूप
जननोपक्षीणत्वात् ॥ पटं प्रत्यपि कारणत्वे कल्पनागौरवात् ॥ तेनान्यथासि न
घ२ द्धनियत [illegible] पूर्वभावित्वं कारणत्वं ॥ अनन्यथासिद्धनियतपश्चाद्भावि त्वं का ॥२
र्यत्वं ॥ यत्तु कश्चिदाह ॥ कार्यानुकृतान्वयव्यतिरेकि कारणमिति ॥ तद
युक्तं ॥ नित्यविभूनां व्योमादीनां कालतो देशतश्च व्यतिरेकासंभवे र

3

गा

नाकारंयेव संगात्॥ तच्च कारणं त्रिविधं॥ समवाय्यसमवायिनिमित्त
भेदात्॥ तत्र॥ यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं॥ यथा तंत
वः पटस्य समवायिकारणं॥ तंतुष्वेव हि पटः समवेतो जायते॥ न तूर्यादि
षु॥ ननु तंतुसंबंधइव तूर्यादिसंबंधोपि पटस्य विद्यते तत्कथं तंतुष्वेव
हि पटः समवेतो जायते न तूर्यादिषु॥ सत्यं॥ द्विविधः संबंधः॥ संयोगः सम
वायश्चेति॥ तत्राऽयुतसिद्धयोः संबंधः समवायः॥ अन्ययोस्तु संयोग
एव॥ कौ पुनरयुतसिद्धौ॥ ययोर्द्वयोर्मध्ये एकमपराश्रितैवावतिष्ठ मे
ते अविनश्यत्॥ तावयुतसिद्धौ॥ तदुक्तं॥ तावेवायुतसिद्धौ द्वौ विज्ञा ते
तव्यौ ययोर्द्वयोः॥ अनश्यदेकमपराश्रितमेवावतिष्ठते॥१॥ यथाव
यवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती विशेषनि

4

तुपटा वयववयवावयविना। नत्योः संबंधः समवायः। अयुत [illegible] सिद्धत्वात्। तुरीपटयोरुक्तं समवायः। [illegible]ता सिद्धचाभा
यो [illegible] पृथक्सिद्धि [illegible] त्वान्ना तुरीपटसंभीतं नावतिष्ठते। ना [illegible] विषयः पटयोर्मीतः। अतस्तयोः संयोग एव न तु समवाय वेदातःपट

ग्रो षड्विधेयेति॥ अवयव्यादयो हि यथाक्रममवयवाद्याश्रिता एवावतिष्ठंते वर्तिः
अविनश्यंतः॥ विनश्यदवस्थास्त्वनाश्रिता एवावतिष्ठंते। यथा तंतुना
शे सति पटः॥ आश्रयनाशे सति गुणः॥ विनश्यत्ता तु विनाशकारणसाम
ग्री सान्निध्यं॥ अत एवैतेषु द्वयोरयुतसिद्धत्वात्समवायः। पटः। यत्सम
वेतं कार्यमुत्पद्यते तत्समवायिकारणं॥ अतस्तंतु[illegible]वः पटस्य समवायिका
रणं॥ न [illegible] तुर्यादि॥ पटस्य स्वगतरूपादेः समवायिकारणं। एवं मृत्पिंडोऽ डो
श्रास्य पि घटस्य समवायिकारणं। घटस्य स्वगतरूपादीनां समवायिकारणं ॥२॥
॥ ननु नन्वेवं घटादयो जायंते॥ तद्वैव तद्गतरूपादयोपि जायंते। अ
तः समानकालीनत्वेन गुणिनोः सव्येतरगोविषाणवत् [illegible] कार्यकारण
भावो नास्ति॥ पौर्वापर्याज्ञानात्। अतो [illegible] रूपादिं प्रति न समवायिका
रणत्वं रणा हि घटादीनां कारणविशेषत्वात्समवायिकारणस्य। अतो
एवर हुर शेद नर

5

गुण १ ति४

द्यते॥ नैगुणिनोःसमानकाल्विनंजन्मकिंतुद्रव्यंनिर्गुणमेवक्षणमु
त्पद्यते॰ पश्चात समवेता गुणा नुत्पद्यंते॥ समानकालोत्पत्तौ गुणगुणी
नोः समान सामग्रीकत्वाद्भेदो न स्यात्॥ कारण भेदनियम[illegible]स्य कार्यभे
दस्य॥ तस्मात्प्रथमे क्षणे निर्गुण एव घटो गुणस्यःपूर्वभावी भवति गुणानां
समवायिकारणं॥ तद्वाकारणभेदोप्यस्ति॥ घटो हि घटं प्रति न कारणं॥
एकस्यैव पौर्वापर्याभावात्॥ नहि स एव तमेव प्रति पूर्वभावी पश्चाद्भावी
वेति॥ संभवति॥ स च गुणान्प्रति पूर्वभावी [illegible] भवति गुणानां कारणं॥ नन्वे
वं सति प्रथमे क्षणे घटोऽप्यचाक्षुषः स्यात्॥ अस्तपिद्वा तावायुवर॥ तदे
वहि द्रव्यं चाक्षुषं यन्महत्वे सत्युद्भूतरूपवत्॥ अद्रव्यं वस्यात्॥ गुणाश्र
त्वाभावात्॥ गुणाश्रयोऽद्रव्यमिति हि द्रव्यलक्षणं॥ सत्यं॥ [illegible] प्रथमेव[illegible]
रमक्ष्मो यदि घट ध्वक्षेषानरचिते तदाकालो हानेः॥ नहि स[illegible]

समवायि

गु२
तो४
वि१ चे

द्वितीयादिक्षणेषुघटेगुणा
न्पद्यते॥२ घ१ यद्गुणा२ निर्गुणाएव घ८

तर्क॥
सनग्रंथ२
॥श्री॥

त्तिपक्षेपिनिमेषा[illegible]वसरेघटद्वैगुण्यसत्त्वात्।तेनव्यवच्छित्तमेतत्[illegible] गुत्पद्यते
क्षणेअद्रव्यत्वापत्तिः।समवायिकारणंद्रव्यमितिद्रव्यलक्षणायोगाद्यो प्रथम
ग्यतयागुणाश्रयत्वंवाच्यं॥गुणाश्रयत्वंगुणात्यंताभावानधिकरणत्वं॥
असमवायिकारणंतदुच्यते॥यत्समवायिकारणप्रत्यासन्नमवधृत
सामर्थ्यंतदसमवायिकारणं।यथातंतुसंयोगःपटस्यासमवायि
कारणं।तंतुसंयोगस्यपटसमवायिकारणेषुतंतुषुसमवेतत्वेन गुणेषु
समवायिकारणप्रत्यासन्नत्वात्।अनन्यथासिद्धनियतपूर्वभावि ॥श्री॥
त्वेनपटंप्रतिकारणत्वाच्च॥एवंतंतुगतरूपंपटगतरूपस्यासमवा
यिकारणं।ननुपटगतरूपस्यपटःसमवायिकारणं।तेनतद्गत
स्यैवकस्यचिद्धर्मस्यपटरूपंप्रत्यसमवायिकारणत्वमुचितं।समवा

गुणस्य५

तु तु

यिकारणप्रसासन्नत्वात्॥ नैतं तुगतरूपस्य समवायिकारणप्रसास

ना सात्तावात्॥ मैवं॥ समवायिकारणसमवायिकारणप्रयासंन्नस्यापितं

तुरूपस्य परंपरया समवायिकारणप्रसासन्नसात्॥ निमित्तकारणमु

च्यते॥ यंन्नसमवायिकारणं नाप्यसमवायिकारणं अथ च कारणं तंनि

मित्तकारणं॥ यथा तुरीवेमादिकं पटस्य निमित्तकारणं॥ तदेतद्भावानां

वमेव त्रिविधं कारणं॥ अभावस्य तु निमित्तमात्रं॥ तस्य कचिद्रूपस्य समवाया

तु त्॥ समवायस्य भावद्धयधर्मत्वात्॥ तदेतस्य त्रिविधस्य कारणस्य मध्ये यदेव

कथमपि सातिशयं तदेव कारणं। तेनैतद्व्यवस्थितमेवैतल्लक्षणं प्रमाकर ब्ध

णं प्रमाणमिति॥ यत्त्वनधिगतार्थगंतृ प्रमाणमिति॥ एकस्मिन्नेव घटे घटो तन्नः

यं घटोयमिति धारावाहिकज्ञानानां गृहीतग्राहिणामप्रामाण्यप्रसंगात्॥

नन्यान्यत्वेन लवविलिरवविषयीकरणादनधिगतार्थगंतृता॥ प्रसक्षेण

वं ५ प्रमाणलक्षणं ३

तर्क॰ ॥

सूक्ष्मकालभेदानाकलनात् ॥ घटस्य हि क्रियादिसंयोगोत्तराणां च तूर्णं योगपद्या
भिमानो न स्यात् ॥ ननु प्रमायाः कारणानि बहूनि संति प्रमातृप्रमेयादीनि ॥ तान्य
पि किं करणान्युक्तनेति ॥ उच्यते ॥ सत्यपि प्रमातरि प्रमेये च प्रमानुत्पत्तेः इंद्रियसं
योगादौ च सत्यविलंबेन प्रमोत्पत्तेः इंद्रियसंयोगादिरेव करणं ॥ साधकं चाविलं
बेप्पनेनैवोत्कर्षेणास्य प्रमात्रादिभ्योतिशायितत्वात् ॥ अतिशायितं साधकं सा
धकतमं तदेव कारणमित्युक्तं ॥ अत इंद्रियसंयोगादिरेव प्रमाकरणत्वात्प्रमाण ॥५१
॥ ननु प्रमा[illegible]दि ॥ तानि च प्रमाणानि चत्वारीति ॥ तथा च न्यायसूत्रं ॥ प्रत्यक्षानु
मानोपमानशब्दाः प्रमाणानीति ॥ किंपुनः प्रत्यक्षं ॥ साक्षात्कारिप्रमाकरणं
प्रत्यक्षं ॥ साक्षात्कारिणी च प्रमा सैवोच्यते ॥ सा इंद्रियजा ॥ सा च द्विधा ॥ सवि
कल्पकनिर्विकल्पकभेदात् ॥ तस्याः करणं त्रिविधं ॥ कदाचिदिंद्रियं ॥ क
दाचिदिंद्रियार्थसंनिकर्षः कदाचिज्ज्ञानं ॥ कदा पुनरिंद्रियं करणं ॥ यदा निर्विक
ल्पकरूपा प्रमा फलं ॥ तदेंद्रियं करणं ॥ तथा हि ॥ आत्मा मनसा संयुज्यते ॥ मन

क२

॥५१॥
ञा
श्री

इंद्रियेण इंद्रियमर्थेन इंद्रियाणां वस्तुप्राप्यकारित्वनियमात्॥ ततोर्थसं
कृष्टे नेंद्रियेण निर्विकल्पकं नाम जात्यादियोजनारहितं वस्तुमात्रावगा
हि किंचिदिदमिति ज्ञानं जन्यते॥ तस्य ज्ञानस्येंद्रियं करणं॥ छिदायाएव प
रशुः॥ इंद्रियार्थसन्निकर्षोवांतरव्यापारः॥ छिदाकरणस्य परशोरिव दारु
संयोगः॥ निर्विकल्पकज्ञानं फलं॥ परशोरिव छिदा॥ कदा पुनरिंद्रियार्थ
क६ सन्निकर्षः करणं॥ यदा निर्विकल्पकानंतरं सविकल्पकं नाम जात्यादियो
जनामकं डित्थोयं ब्राह्मणोयं श्यामोयमिति॥ विशेषणविशेष्यावगाहि ज्ञान
त८ मुत्पद्यते॥ तदेंद्रियार्थसन्निकर्षः करणं॥ निर्विकल्पकज्ञानमवांतरव्या
पारः॥ सविकल्पकज्ञानं फलं॥ कदा पुनर्ज्ञानं करणं॥ यदोक्तसविकल्पका
नंतरं हानोपादानोपेक्षाबुद्धयो जायंते तदा निर्विकल्पकज्ञानं करणं॥
॥सविकल्पकज्ञानमवांतरव्यापारः॥ हानोपादानोपेक्षाबुद्धयः फलं॥

त्वे सति त १

तज्जन्य~~त्वे सति~~ तज्जन्यजनकोवांतरव्यापारः॥ यथा कुठारजन्यः कुठारदारु
संयोगः कुठारजन्यछिदा~~ज~~जनकः॥ अत्र काज्ये दाहः॥ सविकल्पकाद्य
नि सर्वाण्यवांदीनामपींद्रियमेव करणं॥ यावंत्ति सांतरालिकानि कोजादी
नि तानि सर्वाण्यवांतरव्यापारः॥ इंद्रियार्थयोस्तु यः संनिकर्षः साक्षात्कारि
प्रमाहेतुः स षड्विध एव॥ तद्यथा॥ संयोगः संयुक्तसमवायः॥ संयुक्तसमवे
तसमवायः॥ समवायः॥ समवेतसमवायः॥ विशेषणविशेष्यभावश्चे
ति॥ तत्र यदा चक्षुषा घटविषयं ज्ञानं जन्यते तदा चक्षुरिंद्रियं घटोर्थः अ
॥६॥ नयोस्संनिकर्षः संयोग एव॥ अयुतसिद्ध्यभावात्॥ एवं मनसांतरेणेंद्रि
य यदाऽत्मविषयं ज्ञानं जन्यते अहमिति तदा मन इंद्रियं आत्मार्थः अनयोः
स निकर्षः संयोग एव॥ अयुतसिद्ध्य) कदा पुनः संयुक्तः समवायः संनिकर्षः
चक्षुःसंयुक्ते घटगतरूपादि गृह्यते घटे श्यामं रूपमस्तीति तदा चक्षु
द्ध्यभावात् २ त्वा ४

रिंद्रियं घटगतरूपमर्थः अनयोः संनिकर्षः संयुक्तसमवाय एव॥ चक्षुःसं-
युक्ते घटे रूपस्य समवायात्॥ एवं मनसाऽऽत्मसमवेते सुखादौ गृह्यमाणे त्र-
यमेव संनिकर्षः। घटगतपरिमाणादिग्रहे चतुष्टयसंनिकर्षोप्यधिककारण-
मिष्यते॥ सत्यपि संयुक्तसमवाये तदभावे दूरे परिमाणाद्यग्रहणात्॥ चतुष्ट-
सा यसंनिकर्षो यथा॥ इंद्रियावयवैरर्थावयवानां इंद्रियावयविनाऽर्थावयविनः।
इंद्रियावयवैरर्थावयविनः॥ इंद्रियावयविनाऽर्थावयवानां संयोग इति
कदा पुनः संयुक्तसमवेतसमवायः संनिकर्षः॥ यदा चक्षुषा घटगतरूपादिस-
मवेतरूपत्वादिसामान्यज्ञानं जन्यते॥ तदा चक्षुरिंद्रियं॥ रूपत्वादिसामान्यम-
र्थः॥ अनयोः संनिकर्षः संयुक्तसमवेतसमवाय एव॥ चक्षुःसंयुक्ते घटे रूपं समवेतं॥
तत्र रूपत्वादिसमवायः॥ कदा पुनः समवायः संनिकर्षः॥ यदा श्रोत्रेण शब्दो गृह्य-
ते तदा श्रोत्रमिंद्रियं॥ शब्दोर्थः॥ अनयोः संनिकर्षः समवाय एव॥ अयुतसिद्धेः॥
श्रोत्रस्याकाशात्मकत्वात्॥ शब्दस्याकाशगुणत्वात्॥ गुणगुणिनोश्च स
कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं॥१

12

संनिकर्षः४

मवायात्॥ कदा पुनः समवेतसमवायः संनिकर्षः॥ यदा शब्दे समवेतं शब्दत्वादि
सामान्यं श्रोत्रेंद्रियेण गृह्यते तदा श्रोत्रमिंद्रियं शब्दत्वादि सामान्यमर्थः॥ अनयोः
संनिकर्षः समवेतसमवाय एव॥ श्रोत्रसमवेते शब्दे शब्दत्वस्य समव ॥
यात्॥ कदा पुनर्विशेषणविशेष्यभावः इंद्रियसंयुक्ते भूतले घटाभावो गृह्य
ते॥ इह भूतले घटो नास्तीति तदा चक्षुःसंयुक्तस्य भूतलस्य घटाभावो वि
शेष्यः विशेषणं वा॥ यदा वा मन सयुक्ते आमनि सुखाद्यभावो गृह्यते अहं
सुखरहित इति तदा मनसंयुक्तस्यात्मनः सुखाद्यभावो विशेषणं॥ यदा श्रो
१॥ त्रसमवेते गकारे घत्वाभावो गृह्यते घत्वरहितो गकार इति तदा श्रोत्रसमवे ॥१॥
तस्य गकारस्य घत्वाभावो विशेषणं॥ तदेवं संक्षेपतः पंचविधसंबंधा॥ न्य त बो२
मसंब[illegible]संबंध्य विशेषणविशेष्यभावलक्षणेनेंद्रियार्थसंनिकर्षेण भाव्य
स्यते॥ एव[illegible]समवायोपि॥ यदा संबंधस्य तंतो विशेष्यभूतस्य पटस्य समं
वायो गृह्यते॥ इह तंतुषु पटसमवाय इति॥ [illegible] दे च बोढा संनिकर्षो वर्णितः।संग

घ२

तर

हथ्या अदत्ता प्रमितिर्द्वैध्या सविकल्पाविकल्पिका॥ करणं त्रिविधं त
स्याः सन्निकर्षस्तु षड्विधः॥ ननु निर्विकल्पकं परमार्थसत्स्वळक्षणविषयं
वांतु भवतु प्रसक्तं॥ सविकल्पकं तु शब्दलिंगवदनुगताकारावगाहि सा
मान्यविषयं कथं प्रसक्तं॥ अर्थजस्यैव प्रसूदहात्॥ अर्थस्य परमा
र्थसत एव जनकत्वात्॥ स्वळक्षणस्य परमार्थसत्॥ ननु सामान्यं॥ तस्य
प्रमातानिरस्तविधिभावस्यान्यव्याहसामने[illegible]च्छेसात्॥ मैवं॥ सामान्य
स्यापि वस्तुभूतत्वात्॥ तदेवं व्याख्याते प्रसक्तं॥ लिंगपरामर्शोनुमानं॥ ये
नहि अनुमीयते तदनुमानं॥ लिंगपरामर्शेनानुमीयते अतो लिंगप
रामर्शोनुमानं॥ तच्च धूमादिज्ञानं॥ अनुमितिं प्रतिकरणत्वात्॥ अ[illegible]
दिज्ञानमनुमितिकरणं धूमादिज्ञानं॥ किं पुनर्लिंगं॥ कथ्यते तस्य परा
मर्शः॥ उच्यते॥ व्याप्तिबलेनार्थगमकं लिंगं॥ यथा धूमोग्नेर्लिंगं॥ त

न्या २

तर

था हि॥ यत्र धूमस्तत्राग्निरिति॥ साहचर्यनियमो व्याप्तिः॥ तस्यां गृहीताया
मेव धूमोग्निं गमयति अतो व्याप्तिबलेनाग्न्यनुमापकत्वा धूमोग्नेर्लिंगं॥
तस्य त्रितीयज्ञानं परामर्शः॥ तथाहि॥ प्रथमं तावन्महानसादौ भूयो भू
यो धूमं पश्यंश्च वह्निं पश्यति॥ तेन भूयोदर्शनेन धूमाग्न्योः स्वाभाविकं संबं
धमवधारयति॥ यत्र धूमस्तत्राग्निरिति॥ यद्यपि यत्र यत्र मैत्रीतन
त॥ यत्वं तत्र तत्र श्यामत्वमिति भूयोदर्शनं समानं॥ तथापि मै॥त्रीतनयत्व
श्यामत्वयोर्न स्वाभाविकः संबंधः किं त्वौपाधिक एव॥ शाकाद्यन्नपरि
णामस्योपाधेर्विद्यमानत्वात्॥ तथाहि॥ श्यामत्वे मैत्रीतनयत्वं न प्रयोजकं किं
घं तु शाकाद्यन्नपरिणतिभेद एव प्रयोजकः॥ प्रयोजकश्चोपाधिरुच्यते॥ न ॥८॥
च धूमाग्न्योः संबंधे कश्चिदुपाधिरस्ति॥ अयोग्यस्य शंकितुमशक्यत्वात् ॥
योग्यस्य चानुपलभ्यमानत्वात्। यत्र ह्युपाधिरस्ति तत्रोपलभ्यते। यथाग्नेर्धूमसं

त१
२४ अस्तिचेत् योग्योऽयोग्यो वा। २

बंधे आर्द्रेंधनसंयोगः॥ हिंसात्वस्य चाधर्मसाधनत्वेन संबंधे निषिद्धत्व
मुपाधिः॥ मैत्रीतनयत्वस्य च श्यामत्वेन संबंधे शाकाद्यन्नपरिणतिभेद एव वा
न चेह धूमस्याग्निसाहचर्ये कश्चिदुपाधिरस्ति॥ यद्यत्र विपक्षत्र तदाद्रूय
तत्ततो दर्शनाज्ञानान्नास्तीति तर्कसहकारिणानुकूलेन साधनेन प्रसद्धे
वोपाध्यभावो गृह्यते॥ तथा चैतदुपाध्यभावग्रहणजनितसंस्कारसहकृते
न भूयोदर्शनजनितसंस्कारसहकृतेन साहचर्यग्राहिणा प्रत्यक्षेणैव धूमाग्न्यो
र्व्याप्तिरवधार्यते॥ तेन धूमाग्न्योः स्वाभाविकः संबंधो न त्वौपाधिकः॥ स्वाभा
विकश्च संबंधो व्याप्तिरुच्यते॥ तदनेन न्यायेन धूमाग्न्योर्व्याप्तौ गृह्यमाणा
से यां महानसे धूमज्ञानं तत्प्रथमं॥ पर्वतादौ पक्षे यद्धूमज्ञानं तद्द्वितीयं॥ तत
पर्वते गृहीतां धूमाग्न्योर्व्याप्तिं स्मरतः तत्रैव पर्वते पुनर्धूमं परामृशतः अ
स्य अपर्वतेऽग्निनाव्याप्यो धूम इति तदेतत् धूमज्ञानं तृतीयं॥ एतच्चावश्य
मविनाभावेति ४

अत्र

मन्यपेतं[illegible]यं ॥ अन्यथा यत्र धूमस्तत्राग्निरित्येव स्यात् ॥ इह तु कथमग्निना
भवितव्यं ॥ तस्मादिहापि धूमोऽस्तीति ज्ञानमन्वेषणीयं ॥ अयमेव लिंगपरा
मर्शः अनुमितिं प्रति करणत्वादनुमानं ॥ स्मात्तदस्त्यत्र पर्वते वह्निरित्यनु
मितिज्ञानमुत्पद्यते ॥ ननु कथं पक्षधर्मज्ञानं सधूमज्ञानं तन्नाग्न्यनुमा
पकं ॥ सत्यं ॥ व्याप्तेरगृहीतत्वात् ॥ गृहीतायामेव व्याप्तावनुमितिरुदयात् ॥ य
था ॥ व्याप्तिनिश्चयोत्तरकालं महानस एवाग्निरनुमीयतां ॥ मैवं ॥ अग्ने
र्दृष्टत्वे संदेहस्याभावात् ॥ संदिग्धस्यार्थोऽनुमीयते ॥ यथोक्तं भाष्यकृ
ता ॥ नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते ॥ अपि तु संदिग्धे ॥ अथ पर्वत
गतमात्रस्य पुंसो यद्धूमज्ञानं तत्कथं नाग्निमनुमापयति ॥ अस्ति चाग्नि
संदेहः ॥ साधकबाधकप्रमाणाभावेन [illegible] संशयस्य न्यायप्रादसात्र
सत्वो ॥ अगृहीतव्याप्तेरिव गृहीतविस्मृतव्याप्तेरपि पुंसोऽनुमा[illegible]नुदये न
व्याप्तिस्मृतेरप्यनुमितिहेतुत्वात् ॥ धूमदर्शनाद्बुद्धसंस्कारो व्याप्तिं स्मर

न
॥ य ॥

त्ता व

त्र थे

॥ ९ ॥

वन्हिव्याप्य

ति॥ यो यो धूमवान् स स अग्निमान्॥ यथा महानस इति॥ तेन धूमदर्शने जातो व्याप्तिस्मृतौ जातायां यद्धूमज्ञानं तत्तृतीयं धूमवां व्याप्यमिज्ञाति॥ तदेवाग्निमनुमापयति नान्यत्॥ स एव लिंगपरामर्शः॥ तेन व्यवस्थितमेतल्लक्षणं लिंगपरामर्शोऽनुमानमिति॥ तच्चानुमानं द्विविधं॥ स्वार्थं परार्थं चेति॥ तत्र स्वार्थं स्वप्रतिपत्तिहेतुः॥ तथा हि॥ स्वयमेव महानसादौ निरीक्षेन प्रत्यक्षेण धूमाग्न्योर्व्याप्तिं ग्रहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वते वर्तिनीमविच्छिन्नमूलामभ्रंलिहां धूमरेखां पश्यन् धूमदर्शनाद्योद्बुद्धसंस्कारो व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति॥ ततोऽत्रापि धूमोऽस्तीति स्वयमेव प्रतिपद्यते॥ तस्मात्पर्वतेऽग्निरस्तीति स्वयमेव प्रतिपद्यते॥ तत्स्वार्थानुमानं॥ यत्तु स्वयं धूमादग्निमनुमाय परं व्युत्पादयितुं पंचावयवमनुमानवाक्यं प्रयुंक्ते तत्परार्थानुमानं॥ तद्यथा॥ पर्वतोयं वह्निमान्धूमवत्वात् यो यो धूमवान् स स वह्निमान् यथा महानसः॥ तथा चायं धूमवान्॥ तस्मा

दृग्निमानेवेति॥ अनेन हि वाक्येन प्रतिपादितास्य[illegible]रूपोप
पन्नाल्लिंगात्परोप्यग्निं प्रतिपद्यते तेनैतत्परार्थानुमानं॥ अत्र पर्वत
स्याग्निमत्वं साध्यं॥ धूमवत्वं हेतुः। स चान्वयव्यतिरेकी॥ अन्वयेन
व्यतिरेकेण च व्याप्तेर्विद्यमानत्वात्॥ तथाहि॥ यत्र धूमस्तत्राग्निर्यथा
न५ महानस इत्यन्वयव्याप्तिः॥ महानसे धूमाग्न्योरन्वयस्य सद्भावदर्शनात्॥
॥१०॥ एवं यत्राग्निर्नास्ति तत्र धूमोपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः॥ ॥
न्याय महाह्रदे धूमाग्न्योर्व्यतिरेकस्य सद्भावदर्शनात्॥ व्यतिरेकव्याप्तेरयं क्रमः। ध।
अन्वयव्याप्तौ य[illegible]प्यं तदभावो व्यापकः। अन्वयव्याप्तौ यत्तु व्यापकं तद ॥५०॥
भावो व्याप्य इति॥ तदुक्तं॥ व्याप्यव्यापक[illegible]भावो हि भावयोर्यादृगिष्यते॥ त
त्र तयोरभावयोस्तस्माद्विपरीतः प्रतीयते॥ व्याप्यस्य वचनं पूर्वं व्यापकस्य त
तः परं॥ एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः॥ अन्वये साधनं व्याप्यं साध्यं
व्यापकमिष्यते॥ साध्याभावोन्यथा व्याप्यो व्यापकः साधनाभाव इति॥ तदेवं

सि १

धूमवत्त्वे हेतावन्वयेन व्यतिरेकेण च व्याप्तिरस्ति॥ यत्तु वाक्ये केवलमन्वय
व्याप्तिरेव प्रदर्शते॥ तदेकेनापि चरितार्थत्वात्॥ तत्राप्यन्वयस्यावक्रत्वात्प्र
दर्शनं ऋजुमार्गेण सिध्यतोर्थस्य वक्रेण साधनायोगात्॥ ननु व्यतिरेक
व्याप्तेरज्ञानात्॥ तदेवं धूमवत्त्वं हेतुरन्वयव्यतिरेकी॥ एवमन्येप्यनित्य
त्वे साध्ये कृतकत्वादयो हेतवोन्वयव्यतिरेकिणो द्रष्टव्याः॥ कश्चिद्धेतुः
केवलव्यतिरेकी॥ यथा सात्मकत्वे साध्ये प्राणादिमत्त्वं हेतुः॥ तथाहि। जीव
च्छरीरं सात्मकं प्राणादिमत्त्वात्॥ यत्सात्मकं न भवति तत्प्राणादिमन्न भवति॥ य
था घटः। न चेदं जीवच्छरीरं तथा॥ तस्मान्न तथेति॥ अत्र जीवच्छरीरस्य
सात्मकत्वं साध्यं॥ प्राणादिमत्त्वं हेतुः स च केवलव्यतिरेकी॥ अन्वयव्याप्तेर
भावात्॥ तथाहि॥ ॥ यत्प्राणादिमत्तत्सात्मकं यथा [illegible]ऽमुक इति दृष्टान्तो नास्ति
॥ जीवच्छरीरं सर्वं पक्षत्वात्॥ एतेषामपि केवलव्यतिरेकिहेतुः॥ यथा मं
णा ५

त्रयाणां मध्ये यो हेतुरन्वयव्यतिरेकी स पंचरूपपन्न एव ॥ स्वसाध्यं साधा-
तुं क्षमते न ह्येकेनापि रूपेण हीनः। तानि च पंचरूपत्वं॥ यसत्त्वत्प्रतिपक्षत्वं चेति
एतानि पंचरूपाणि धूमवह्नेर्हेतौ अन्वयव्यतिरेकिणि विद्यंते। ॥ तथाहि ॥ ॥
धूमवत्त्वं पक्षस्य पर्वतस्य धर्मः ॥ पर्वते तस्य विद्यमानत्वात्॥ एवं सपक्षे सत्त्वं
॥ सपक्षे महानसादौ विद्यत इत्यर्थः॥ एवं विपक्षाद्व्यावृत्तिः॥ तत्र नास्तीत्य-
र्थः॥ एवमबाधितविषयत्वं धूमवत्त्वं॥ तथाहि॥ ॥ धूमवत्त्वस्य हेतोर्विषयः साध्यो
धर्मः। तच्चाग्निमत्त्वं तच्चे नापिप्रमाणेन न बाधितं। न खंडितमित्यर्थः। एवमस-
त्प्रतिपक्षो यस्येसैं सत्प्रतिपक्षं धूमवत्त्वं॥ तथाहि॥ साध्यविपरीत साधकं
हेत्वंतरं प्रतिपक्ष इत्युच्यते॥ स च धूमवत्त्वहेतौ नास्त्येव॥ अनुपलंभात्॥ त-
देवं धूमवत्त्वहेतौ पंचरूपाणि विद्यंते। तेनैव धूमवत्त्वमग्निमत्त्वस्य गमकं सा-
धकं॥ सोग्निमत्त्वस्य साधकः॥ अग्नेः पक्षधर्मत्वं हेतोः पक्षधर्मताबलात्सिध्यति
॥ तथाति अनुमानस्य द्वे अंगे व्याप्तिः पक्षधर्मता चेति॥ तत्र व्याप्यसाध्यसाम

21

न्यसिद्धिः॥ पक्षधर्मताबलात्साध्यस्यपक्षे संध धिहॅविशेषः सिध्यति॥ प
तधर्मेण धूमवत्त्वेन वन्हिरपिपर्वतसंबंध एवानुमीयते॥ अन्यथा साध्यसामान
स्यो॥ व्याप्तिग्राहकादेवसिद्धेः एतमनुमेनेना॥ पस्य न्वोपन्नव व्यतिरेकीहेतु
स सर्वः पंचरूपोपपन्न एव सद्धेतुः। अन्यथा हेत्वाभासो हेतुरितियावत्॥
वलान्वयी चतुरूपोपपन्न एव॥ स च साध्यं साधयति॥ तस्य हि वि[illegible]क्षाद्व्या
त्तिर्नास्ति॥ विपक्षाभावात्॥ केवलव्यतिरेकी [illegible]यतुरूपोपपन्न एव॥ तस्य
हि सपक्षे सत्त्वं नास्ति सपक्षाभावात्॥ के पुनः पक्षसपक्षविपक्षाः॥ उच्यते॥
१२। संदिग्धसाध्यधर्मा धर्मी पक्षः॥ यथा धूमानुमाने पर्वतः॥ सपक्षस्तु निश्चितसा
ध्यधर्मा धर्मी॥ यथा तत्रैव धूमानुमाने महानसः॥ विपक्षस्तु निश्चितसाध्याभा
ववान धर्मी॥ यथा तत्रैव महाहृद इति॥ तदेवमन्वयव्यतिरेकिकेवलान्वयि
केवलव्यतितिरेकिता स्वयोदर्शिताः॥ अतोन्ये हेत्वाभासाः॥ ते चासिद्धविरु
द्धानैकांतिककालात्ययापदिष्टप्रकरणसमसंदिग्धे [illegible] ये च॥ तत्रानिश्चि
आश्रयासिद्ध :स्वरूपासिद्धाव्याप्यत्वा

K K S U LIBRARY
RAMTEK
441 106
M-1485
Dist Nagpur

```
[OrderDescription]
,CREATED=21.10.20 16:00
,TRANSFERRED=2020/10/21 at 16:03:37
,PAGES=22
,TYPE=STD
,NAME=S0004324
,Book Name=M-1885-SHADANDHAR GRANTHSAY ANUKARAMNIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,
```